# রেণুকা গীতম্

{॥ রেণুকা গীতম্ ॥}

শ্রী গণেশায নমঃ ।

সুর শিরশ্চরচ্চরণ রেণুকা । জগদধীশ্বরী জযতি রেণুকা ॥

দেবতা শিরো দেশ লালিতম্ । রেণুকা পাদং দিশতু মে মুদম্ ॥

কুণ্ডলীপুরী মণ্ডনং মহঃ । কিমপি ভাসতাং মম সদা হৃদি ॥

মস্তকৈতবং বস্তু শাশ্বতম্ । অস্তি মে সদা শস্তদং হৃদি ॥

আদিনারি তে পাদপঙ্কজম্ । স্ফুরতু মে মনঃ সরসিজে সদা ॥

কেবলং পদো সেবকোঽস্মি তে । বেদ্মি নেতরদ্বেদ সন্নুতে ॥

হৃদয তেণুনঃ সমুচিতোঽণুনা । পরিচযোঽম্বিকা পাদরেণুনা ॥

পাহি মুঞ্চ বা পাদপঙ্কজম্ । ত্রিদশ সন্নুতে ন ত্যজামি তে ॥

চরণমম্ব তে যো নিষেবতে । পুনরযং কুচৌ ধযতি কিং কৃতী ! ॥

অহরহোঽম্ব তে রহসি চিন্তযা । ধন্যতাং গতো নান্যদর্থযে ॥

স্মরজিতো যথা শিরসি জাহ্নবী । জননি রেণুকে মনসি তে কৃপা ॥

অম্ব পাহি মাং দম্ব তাপসি । পাদপঙ্কজযোঃ আদিকিঙ্করম্ ॥

পুত্রমাত্মনঃ পুণ্যকীর্তনে । বহুকৃপে কুতো মামুপেক্ষসে ॥

অম্ব সংস্তুতে জন্তু বৈরিণা ।

পাহি মামিমং মগ্নমাপদি । তত্ত্ববাদিনাঃ সত্ত্বশালিনী ॥

ত্বামজে বিন্দুঃ সৎস্বরূপিণীম্ । ত্বাং প্রচক্ষতে সদযবীক্ষিতে ॥

বেদি বেদিনো মোদরূপিণীম্ । সংবিদং বিদুস্ত্বামিদং প্রভুম্ ॥

পরমযোগিনঃ পরমদেবতে ।

জননি কুণ্ডলীপুর নিবাসিনি । পরশুরামবৎপশ্য মামিমম্ ॥

তনযরোদনং শ্রবণশালিনি । শৃণুসুরার্চিতে যদি দযা হৃদি ॥

যাচকঃ সুতো ভজনমীপ্সিতম্ । তদপিদুর্লভং কিমিদমম্বিকে ॥

মাস্তু বেতনং ছিন্নমস্তকে। ভজনমেব তে যাচ্যতে মযা ॥

তরলতারযা জ্বলনদীর্ঘযা। সানুকম্পযা শীতপাতযা ॥

কেবলং দৃশাং পশ্য রেণুকে। তেন মে শুভং ন চ তবাশুভম্ ॥

কিঙ্করীভবৎসুরবিলাসিনী। জযতি কুণ্ডলী নগরবাসিনী ॥

মধুরমম্ব তে চরণপঙ্কজম্। তত্র যদ্রতৈস্ত্যজ্যতেঽখিলম্ ॥

চরণমম্ব তে চরতু মে হৃদি। ইযমনামযে প্রার্থনা মম ॥

ভুজগকঙ্কণপ্রভৃতি সংস্তুতে। ভুজভুবামরের্জননি পাহিমাম্ ॥

কুণ্ডলীপুরী মণ্ডনাযিতা। গণপতিস্তুতা জযতি রেণুকা ॥

ইতি শ্রী বসিষ্ঠ গণপতিমুনি প্রোক্তং রেণুকা গীতম্ সম্পূর্ণম্ ॥

This is the ReNuka Stuthi composed by Vashishta Ganapati Muni at Padaivedu near Velur. There is a wonderful temple dedicated to Goddess Renuka (Chinnamasta) at Padivedu. Here the Muni had the vision of Asthra Mantra

related to Parasurama. This is also the place where Brahmarishi Daivarata had the mantra darshana of 500 Rig Veda Mantras which are called Chandodarshana. Even today, there is a life size portrait of Ganapathi Muni inside the temple to mark the commemoration of the visit of Ganapati Muni and his tapas here for 21 days. This Devi is also called the Kundalini Shakti and hence Padiveedu is called Kundali Pura and devi is called Kundali Puri.

-- Sriram

Encoded and proofread by Kaushal S. Kaloo kaushalskaloo at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Renuka Geetham Lyrics in Bengali PDF
% File name : reNukAgItam.itx
% Category : gItam
% Location : doc_devii
% Author : Shri Vasishtha Ganapati Muni
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com
% Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com
% Description-comments : from shrIreNukAtantram, Pitambarapeeth, Datia
% Latest update : June 22, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website